सप्तमः पाठः ७

# भारतभक्ताः



वयं बालकाः भारतभक्ताः
वयं बालिकाः भारतभक्ताः
वयं हि सर्वे भारतभक्ताः
पृथ्वीं स्वर्गं जेतुं शक्ताः ।।
वयम् ..................... ।।
वयं सुधीराः वयं सुवीराः
हृष्टमानसाः पुष्टशरीराः
भूरि पठामो भूरि लिखामो
भवितास्मो जनहिते नियुक्ताः ।।
वयम् ..................... ।।
जाति-धर्म-मत भेदं त्यक्त्वा
भारतवर्षं पूज्यं मत्वा
भगवद्भावं हृदये धृत्वा
भारतसेवायामनुरक्ताः ।।
वयम् ..................... ।।

( डॉ. नरेन्द्रः )

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| भारतभक्ताः | देशभक्तः | भारत के भक्त |
| पृथ्वीम् | धराम् | पृथ्वी को |
| स्वर्गम् | देवतालोकम् | स्वर्ग को |
| जेतुम् | जयनाय | जीतने के लिए |
| शक्ताः | समर्थाः | समर्थ |
| सुधीराः | धैर्यशालिनः | धैर्यशाली |
| सुवीराः | बलशालिनः | वीर |
| हृष्टमानसाः | प्रसन्नमानसाः | प्रसन्न मन वाले |
| भूरि | अधिकम् | बहुत |
| भवितास्मः | भविष्यामः | (हम) होंगे |
| जनहिते | लोकहिते | लोगों के हित में |
| नियुक्ताः | नियोजिताः | संलग्न |
| भेदम् | भेदभावम् | अन्तर को |
| त्यक्त्वा | विहाय | छोड़कर |
| भारतवर्षम् | भारतदेशम् | भारत देश को |
| मत्वा | अभिमत्य | मानकर |
| भगवद्भावम् | ईशभावम् | ईश्वर के भाव को |
| हृदये | हृदि | हृदय में |
| धृत्वा | धारणं कृत्वा | धारण करके |
| भारतसेवायामनुरक्ताः | देशसेवायामनुरक्ताः | भारत की सेवा में लगे हुए |

## अभ्यासः

### १. उच्चारणं कुरुत -

| | | | |
|---|---|---|---|
| भारतभक्ताः, | पृथ्वीम्, | स्वर्गम्, | हृष्टमानसाः, |
| पुष्टशरीराः, | भवितास्मः | नियुक्ताः, | त्यक्त्वा, |
| भारतवर्षम्, | हृदये, | धृत्वा, | भारतसेवायामनुरक्ताः । |

### २. रिक्तस्थानानि पूरयत -

(क) वयं बालकाः ........................................................................ ।

(ख) पृथ्वीं ................................................................. जेतुं शक्ताः ।

(ग) भूरि पठामो भूरि .................................................................... ।

(घ) .................................................................. जनहिते नियुक्ताः ।

(ङ) भगवद्भवं ................................... धृत्वा, भारतसेवायामनुरक्ताः ।

### ३. परस्परं सुमेलयत -

| | |
|---|---|
| (क) वयं सुधीराः | अनुरक्ताः |
| (ख) हृष्टमानसाः | वयं सुवीराः |
| (ग) भारतसेवायाम् | भारतभक्ताः |
| (घ) वयं हि सर्वे | पुष्टशरीराः |

### ४. मञ्जूषायां दत्तानां पदानां साहाय्येन वाक्यनिर्माणं कुरुत -

| |
|---|
| सुवीराः |
| कर्तव्यनिष्ठाः |
| स्वस्थमानसाः |
| भारतीयाः |
| राष्ट्रभक्ताः |

**यथा-** वयं सुवीराः ।

....................................................... ।

....................................................... ।

....................................................... ।

....................................................... ।

## योग्यता-विस्तारः

अस्मिन् पाठे यूयं 'वयं बालकाः भारतभक्ताः' इत्यस्य गीतस्य पठनं कृतवन्तः । पठनम् एव न, अपितु गायनस्य अभ्यासम् अपि कृतवन्तः स्युः । गीतगायनम् अतीव आनन्दकरं भवति ।

संस्कृते एतादृशानि आनन्ददायकानि अनेकानि गीतानि सन्ति । तानि अन्यानि गीतानि अपि विविध-पुस्तकेभ्यः, सान्द्रमुद्रिकाभ्यः (C.D.), ध्वनिमुद्रिकाभ्यः (Cassette), अन्तर्जालात् (Internet) च प्राप्तुं शक्यन्ते। युष्माकम् अभ्यासार्थम् एकम् अपरं गीतम् अत्र अस्ति -

**भारतं भारतं भवतु भारतम् ।**
**शक्तिसम्भृतं युक्तिसम्भृतं**
**शक्ति-युक्तिसम्भृतं भवतु भारतम् ।( भारतं भारतं ........... )**

**शस्त्रधारकं शास्त्रधारकं**
**शस्त्रशास्त्रधारकं भवतु भारतम् ।( भारतं भारतं ................ )**

**रीतिसंस्कृतं नीतिसंस्कृतं**
**रीति-नीतिसंस्कृतं भवतु भारतम् ।( भारतं भारतं .............. )**

**कर्मनैष्ठिकं धर्मनैष्ठिकं**
**कर्मधर्मनैष्ठिकं भवतु भारतम् ।( भारतं भारतं ................ )**

**भक्तिसाधकं मुक्तिसाधकं**
**भक्ति-मुक्तिसाधकं भवतु भारतम् ।( भारतं भारतं ........ )**

**अध्यापकाय निर्देशः -**

। अध्यापकः अस्य गीतस्य अपि छात्रैः सस्वरगायनं कारयेत् ।